# लघु-गद्यांशः

इस भाग में 50-60 शब्दों का लघु गद्यांश दिया जाता है व उस पर आधारित 5 अंकों के प्रश्न पूछे जाते हैं। कभी-कभी 70-80 शब्दों का दीर्घ अपठित गद्यांश दिया जाता है व उसके आधार पर 10 अंको के प्रश्न पूछे जाते हैं।

**गद्यांश के उत्तर लिखते समय ध्यान देने योग्य बातें-**

1. गद्यांश को ठीक प्रकार से पढ़कर ही प्रश्नों के उत्तर देने चाहिए।
2. किसी शब्द का अर्थ समझ में न आने पर पूरे वाक्य को पढ़कर शब्द का अर्थ समझने का प्रयास करना चाहिए।
3. शीर्षक एक या दो शब्दों में पूरे गद्यांश को ध्यान में रखकर देना चाहिए।
4. यदि प्रश्न पूरे वाक्य में पूछा गया हो तो उत्तर पूरे वाक्य में ही दिया जाना चाहिए।
5. दिये गये अव्ययों और विभक्तियों का विशेष ध्यान रखना चाहिए।

## अभ्यासः

**1. भारतवर्षः उत्सवानां देशः। अत्र बहवः उत्सवाः भवन्ति ये भारतीयां संस्कृतिं प्राचीनकालात् अद्य यावत् समुज्जीवयन्ति। उत्सवाः मानवमनसः उदात्तं भावं प्रकटयन्ति। उत्सवैः मानवः नवम् उत्साहं, जागृतिं नवोल्लासं वा प्राप्नोति। वस्तुतः मानवः उत्सवप्रियः प्राणी भवति। यदा तस्य जीवने किमपि सुखमयं क्षणम् आयाति, तदा सः स्वानन्दस्य प्रकटीकरणम् उत्सवानां माध्यमेन करोति। एते अस्माकं जीवनं रसमयं कुर्वन्ति।**

**(क) एकपदेन उत्तरत– (एक पद में उत्तर दीजिए)**

1. मानवः कीदृशः प्राणी भवति?

(i) उत्साहितः (ii) जागृतः (iii) उदात्तः (iv) उत्सवप्रियः

2. उत्सवाः कस्य उदात्तं भावं प्रकटयन्ति?

**(ख) पूर्णवाक्येन उत्तरत– (पूर्णवाक्य में उत्तर दीजिए)**

1. मानवः स्वानन्दस्य प्रकटीकरणं कथं करोति?
2. उत्सवैः मानवः किं किं प्राप्नोति?

**(ग) यथानिर्देशम् उत्तरत– (निर्देश के अनुसार उत्तर दीजिए)**

1. 'करोति' इति क्रियापदस्य कर्ता कः?

(i) सः (ii) उदात्तः (iii) वस्तुतः (iv) उत्सवः

2. 'नवोल्लासम्' अस्य संधिच्छेदः अस्ति–

(i) नव + ओल्लासाम् (ii) न + वोल्लासम् (iii) नवो + लासम् (iv) नव + उल्लासम्



Scanned with CamScanner

2. भारतवर्षे षट् ऋतवः सन्ति। तेषु वसन्तः ऋतुराजः कथ्यते। चैत्रे वैशाखे च मासे वसन्तस्य ऋतुः भवति। वसन्ते द्वौ प्रमुखौ उत्सवौ भवतः वसन्तोत्सवः होलिकोत्सवः च। वसन्तोत्सवे सर्वत्र प्रमादो भवति। नराः नार्यः च सर्वे गायन्ति नृत्यन्ति वा। होलिकोत्सवः फालगुनमासस्य पूर्णिमायां भवति। हर्षातिरेकेण नराः, नार्यः, युवानः, वृद्धाः बालकाः च प्रसन्नाः जायन्ते। जनाः परस्परं रक्तवर्णं रक्तचूर्णं च प्रक्षिपन्ति। द्वेषं विस्मृत्य सर्वे परस्परं मिलन्ति।

**(क) एकपदेन उत्तरत– (एक पद में उत्तर दीजिए)**

1. भारते कति ऋतवः भवन्ति?

(i) षट् (ii) पंच (iii) चत्वारः (iv) त्रयः

2. वसन्तस्य ऋतुः कदा भवति?

(i) वसन्ते (ii) पूर्णिमायां (iii) फाल्गुने (iv) चैत्र-वैशाखयोः

**(ख) पूर्णवाक्येन उत्तरत– (पूर्णवाक्य में उत्तर दीजिए)**

1. होलिकोत्सवे जनाः परस्परं किं प्रक्षिपन्ति?
2. वसन्ते के के प्रसन्नाः जायन्ते?

**(ग) यथानिर्देशम् उत्तरत– (निर्देश के अनुसार उत्तर दीजिए)**

1. 'विस्मृत्य' इत्यत्र कः प्रत्ययः?

(i) तव्यत् (ii) ल्यप् (iii) शानच् (iv) क्तवतु

2. 'पूर्णिमायां' इति पदे का विभक्तिः प्रयुक्ता?

(i) प्रथमा (ii) तृतीया (iii) सप्तमी (iv) पंचमी

3. हिमालयः पर्वतराजः कथ्यते। तत्र अनेकानि दर्शनीयानि पर्यटनस्थलानि तीर्थस्थानानि च सन्ति। न केवलं भारतवर्षस्य विभिन्नेभ्यः प्रदेशेभ्यः अपितु विदेशेभ्योऽपि श्रद्धालवः अत्र आगच्छन्ति बद्रीनाथ-केदारनाथ-गंगोत्री-यमुनोत्री इत्यादीनां च दर्शनं कुर्वन्ति। अस्य प्राकृतिकं सौन्दर्यमपि दर्शकान् आकर्षति। वस्तुतः हिमालयं विना भारतस्य कल्पना अपि नैव कर्तुं शक्यते।

**(क) एकपदेन उत्तरत– (एक पद में उत्तर दीजिए)**

1. कं विना भारतस्य कल्पना नैव कर्तुं शक्यते?

(i) पर्वतम् (ii) प्रकृतिम् (iii) हिमालयम् (iv) सौन्दर्यम्

2. कः पर्वतराजः कथ्यते?

**(ख) पूर्णवाक्येन उत्तरत– (पूर्णवाक्य में उत्तर दीजिए)**

श्रद्धालवः केषां स्थलानां दर्शनं कुर्वन्ति?

**(ग) यथानिर्देशम् उत्तरत– (निर्देश के अनुसार उत्तर दीजिए)**

1. 'पर्वतराजः' इति कस्य विशेषणम्?

(i) तीर्थस्थलस्य (ii) पर्यटनस्य (iii) भारतस्य (iv) हिमालयस्य



Scanned with CamScanner

2. 'प्रदेशेभ्य': इत्यत्र का विभक्तिः?

(i) तृतीया (ii) पंचमी (iii) षष्ठी (iv) सप्तमी

**4. एकदा कौरव-पाण्डवयोः कौशलपरीक्षा अभवत्। आचार्यद्रोणः वृक्षस्य शाखायां लक्ष्यरूपेण एकं कृत्रिमं खगं संस्थाप्य सर्वतः प्रथमं युधिष्ठिरम् अपृच्छत्– वत्स! त्वं वृक्षे किं किं पश्यसि? इति। सः अवदत्– आचार्य! अहं वृक्षं, शाखाः, पत्राणि खगं च सर्वानपि पश्यामि। युधिष्ठिरस्य उत्तरं श्रुत्वा आचार्यः द्रोणः उच्चैः अहसत्।**

**(क) एकपदेन उत्तरत– (एक पद में उत्तर दीजिए)**

1. द्रोणः युधिष्ठिरं कथं सम्बोधितवान्?

(i) पुत्रः (ii) तात (iii) वत्स (iv) सुत

2. लक्ष्यं कः अस्थापयत्?

(i) युधिष्ठिरः (ii) कौरव-पाण्डवौ (iii) वृक्षः (iv) आचार्यद्रोणः

**(ख) पूर्णवाक्येन उत्तरत– (पूर्णवाक्य में उत्तर दीजिए)**

द्रोणेन पृष्टः युधिष्ठरः किम् उत्तरम् अयच्छत्?

**(ग) यथानिर्देशम् उत्तरत– (निर्देश के अनुसार उत्तर दीजिए)**

1. 'पश्यामि' इति क्रियायाः कर्ता कः?

(i) युधिष्ठिरः (ii) द्रोणः (iii) अहम् (iv) सः

2. 'संस्थाप्य' इति पदे कः धातुः कश्च प्रत्ययः?

(i) था + ल्यप् (ii) स्था + ल्यम् (iii) धा + तव्यत् (iv) थाप् + य

**5. परिश्रमः सफलतायाः कुंजिका भवति। परिश्रमी मानवः एव सफलतां प्राप्नोति। अलसः नरः भाग्यवादी भवति। सः सर्वदा चिन्तयति यत्-भाग्येन एव सर्वं फलति। किन्तु एतद्विपरीतं परिश्रमी नरः परिश्रमेण सर्वाणि कार्याणि साधयति। सः सर्वदा परिश्रमे एव विश्वसिति। परिश्रमेण तस्य जीवनं सुखमयं, समृद्धं शान्तिपूर्णं च भवति। अतः उच्यते– उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः।**

**(क) एकपदेन उत्तरत– (एक पद में उत्तर दीजिए)**

1. केन कार्याणि सिध्यन्ति?

(i) ज्ञानेन (ii) भाग्यने (iii) मनोरथैः (iv) उद्यमेन

2. का सफलतायाः कुंजिका भवति?

(i) मानवः (ii) परिश्रमः (iii) नरः (iv) आलस्यम्

**(ख) पूर्णवाक्येन उत्तरत– (पूर्णवाक्य में उत्तर दीजिए)**

परिश्रमिणः जीवनं कीदृशं भवति?

**(ग) यथानिर्देशनम् उत्तरत– (निर्देश के अनुसार उत्तर दीजिए)**

1. 'अलसः' इत्यस्य विलोमपदं गद्यांशात् चिनुत।

(i) सुखी (ii) समृदधः (iii) परिश्रमी (iv) नरः



Scanned with CamScanner

2. 'सर्वाणि कार्याणि' इत्यनयो: विशेष्यपदं किम्?

(i) कार्याणि (ii) सर्वाणि (iii) श्रमेण (iv) [illegible]

6. एकताया: आवश्यकता जीवने पदे-पदे अनुभूयते। एकाकी मानव: किमपि कार्यं कर्तुं न पारयति। समाजस्य, राष्ट्रस्य वा निर्माणम् अपि एकतया एव भवति। तृणानां समूह: मदोन्मत्तान् गजान् अपि बध्नाति। क्षुद्राणां पिपीलिकानां समूह: अन्नस्य राशिम् अपि भक्षयति। एकतया एव वयं स्वराष्ट्रं संरक्षितुं शक्नुम:। तस्या: अभावे वयं छिन्ना: भिन्ना: च भविष्याम:। अत: मानवै: सदा संघे स्थित्वा एव कार्यं करणीयम्। तदैव मानवताया: विकास: समाजस्य च भवितुं शक्नोति।

**(क) एकपदेन उत्तरत– (एक पद में उत्तर दीजिए)**

1. कासां समूह: अन्नस्य राशिं भक्षयति?

2. कस्या: आवश्यकता जीवने अनुभूयते?

(i) समाजस्य (ii) एकताया: (iii) मानवताया: (iv) अन्नस्य

**(ख) पूर्णवाक्येन उत्तरत– (पूर्णवाक्य में उत्तर दीजिए)**

1. एकतया कस्य कस्य निर्माणं भवति?

2. तृणानां समूह: किं करोति?

**(ग) यथानिर्देशम् उत्तरत– (निर्देश के अनुसार उत्तर दीजिए)**

1. 'गजान्' इत्यस्य किं विशेषणम्?

(i) मदोन्मत्तान् (ii) तृणानां (iii) अपि (iv) समूह:

2. 'संरक्षितुम्' अत्र क: प्रत्यय:?

(i) क्त (ii) क्तवतु (iii) क्त्वा (iv) तुमुन्

7. एकदा वने विचरन् एक: सिंह: श्रान्त: भूत्वा निद्रां गत:। अस्मिन् अवसरे एक: मूषक: तस्य मुखे कूर्दित्वा निद्राभङ्गम् अकरोत्। सिंह: तं गृहीत्वा मारयितुम् ऐच्छत्। भीत: मूषक: प्राणरक्षणाय तं प्रार्थितवान्। सिंह: स: मूषकं मुक्तवान् यत्– 'यदा त्वाम् आकारयिष्यामि, त्वं तदा आगत्य मे साहाय्यं करिष्यसि' इति।

**(क) एकपदेन उत्तरत– (एक पद में उत्तर दीजिए)**

1. मूषक: किमर्थं प्रार्थितवान्?

(i) प्राणरक्षणाय (ii) भ्रमणाय (iii) कार्याय (iv) निद्रात्यागाय

2. सिंह: कुत्र विचरन् निद्रां गत:?

(i) अवसरे (ii) वने (iii) मुखे (iv) समये

**(ख) पूर्णवाक्येन उत्तरत– (पूर्णवाक्य में उत्तर दीजिए)**

मूषक: कथं सिंहस्य निद्राभङ्गम् अकरोत्?



Scanned with CamScanner

**( ग ) यथानिर्देशम् उत्तरत–( निर्देश के अनुसार उत्तर दीजिए )**

1. 'यदा' इत्यस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?
2. 'भूत्वा' इति पदे धातुं प्रत्ययं च निर्दिशत।

   (i) भू + क्त (ii) भू + क्तवतु (iii) भू + क्तवा (iv) भव् + त्वा

**8.** संस्कृतभाषा राष्ट्रस्य ऐक्यं साधयति। दिव्या गीर्वाणवाणी सर्वभाषासु रम्या मधुरा च अस्ति। संस्कृतस्य सूक्तयः अस्माकं जीवनस्य दिशां निर्धारयन्ति। जीवनस्य सर्वेषु संस्कारेषु संस्कृतस्य प्रयोगः भवति। संस्कृतस्य गौरवं प्रति कस्यापि हृदये कोऽपि संशयः नास्ति। सर्वे संस्कृतिबोधकाः ग्रन्थाः मूलरूपेण संस्कृत-भाषायाम् एव लिखिताः सन्ति। अतएव उच्यते– "संस्कृतिः संस्कृताश्रिता।"

**( क ) एकपदेन उत्तरत–( एक पद में उत्तर दीजिए )**

1. राष्ट्रस्य ऐक्यं का साधयति?
2. संस्कृतिः कुत्र आश्रिता वर्तते?

   (i) ग्रन्थेषु (ii) सूक्तिषु (iii) संस्कृते (iv) हृदये

**( ख ) पूर्णवाक्येन उत्तरत–( पूर्णवाक्य में उत्तर दीजिए )**

1. संस्कृतभाषायां कीदृशाः ग्रन्थाः लिखिताः सन्ति?
2. सर्वभाषासु रम्या मधुरा च का अस्ति?

**( ग ) यथानिर्देशम् उत्तरत–( निर्देश के अनुसार उत्तर दीजिए )**

1. 'सूक्तयः' इति पदे का विभक्तिः?

   (i) प्रथमा (ii) द्वितीया (iii) तृतीया (iv) षष्ठी

2. 'सर्वेषु' इति पदं कस्य विषेशणम्?

   (i) ग्रन्थेषु (ii) भाषासु (iii) संस्कारेषु (iv) हृदयेषु

**9. विद्या' शब्दस्य अर्थः 'ज्ञानम्' अस्ति। एषा विद्या महता प्रयत्नेन लभ्यते। विद्यावान् नरः एव सर्वत्र सम्मानं लभते। विद्या मानवस्य सर्वश्रेष्ठम् आभूषणं वर्तते। एषा कुरुपम् अपि सुरूपं करोति। विदेशे बन्धुवत् साहाय्यं करोति। अनया एव मानवः कीर्तिं, धनं सुखं च लभते। अतः सर्वैः जनैः स्वजीवने सुखं समृद्धिं च प्राप्तुं विद्या-प्राप्तये प्रयत्नः करणीयः।**

**( क ) एकपदेन उत्तरत–( एक पद में उत्तर दीजिए )**

1. मानवस्य सर्वश्रेष्ठम् आभूषणं किम्?

   (i) ज्ञानम् (ii) सुखम् (iii) प्रयत्नः (iv) विद्या

2. विद्या कथं लभ्यते?

   (i) महता (ii) ज्ञानेन (iii) विदेशे (iv) प्रयत्नेन



Scanned with CamScanner

(ख) पूर्णवाक्येन उत्तरत– (पूर्णवाक्य में उत्तर दीजिए)

1. विद्या-प्राप्तये किमर्थं यत्न: करणीय:?

2. विद्या विदेशे किं करोति?

(ग) यथानिर्देशम् उत्तरत– (निर्देश के अनुसार उत्तर दीजिए)

1. 'सर्वै: जनै:' अनयो: विशेष्यपदं किम्?

(i) जनै: (ii) सर्वै: (iii) अत: (iv) स्वजीवने

2. 'विद्वान्' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(i) ज्ञानी (ii) विद्यावान् (iii) सुरुप: (iv) बन्धु:

10. लोके प्राय: एतद् दृश्यते यत् मनोहारि वच: हितकरं न भवति, अपितु हितकारि वच: कटु भवति। हितकारिवच: अश्वयमेव पालनीयं भवति यतस्तस्मिन् वचसि हितं निहितं भवति। कटुवक्तारो हितैषिणो जना: अस्मिन् संसारे दुर्लभा: भवन्ति। कटुवचनानां श्रोतारोऽपि दुर्लभा: भवन्ति। कटुवचनानि औषधवत् अस्माकं कल्याणमेव कुर्वन्ति न तु अकल्याणम्।

(क) एकपदेन उत्तरत– (एक पद में उत्तर दीजिए)

1. कीदृशं वच: अवश्यमेव पालनीयम्?

(i) हितकारि (ii) मनोहारि (iii) मधुरं (iv) कल्याणकारि

2. कीदृशं वच: हितकरं न भवति?

(i) कटु (ii) मधुरं (iii) मनोहारि (iv) अहितम्

(ख) पूर्णवाक्येन उत्तरत– (पूर्णवाक्य में उत्तर दीजिए)

कटुवचनानि कथम् अस्माकं कल्याणं कुर्वन्ति?

(ग) यथानिर्देशम् उत्तरत– (निर्देश के अनुसार उत्तर दीजिए)

1. 'सुलभा:' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम्?

2. 'पालनीयम् इति पदे क: प्रत्यय:?

(i) तव्यत् (ii) शतृ (iii) शानच् (iv) अनीयर्



Scanned with CamScanner